# Shri Rama Mangalashasanam 2

# શ્રીરામમઙ્ગલાશાસનમ્ ૨

## Document Information

Text title : Shri Rama Mangalashasanam 2

File name : rAmamangalAshAsanam2.itx

Category : raama, mangala

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 12, 2020

*sanskritdocuments.org*

# Shri Rama Mangalashasanam 2

# શ્રીરામમઙ્ગલાશાસનમ્ ૨

શ્રીમન્માર્તાણ્ડવંશે દશરથનૃપતેરાત્મજત્વં પ્રપન્નઃ
    સાકં શેષારિસઙ્ગૈર્નિશિચરનિવહં સંહરિષ્યન્ સુરાર્થે ।
ગુર્વાદિશેન હત્વા પથિ રજનિચરીં પ્રાપ્ય સિદ્ધાશ્રમં યઃ
    ચક્રે યજ્ઞસ્ય રક્ષાં સ દિશતુ ભગવાન્ મઙ્ગલં રામચન્દ્રઃ ॥ ૧॥

રાજ્યં ગચ્છન્ મુનીનામથ પથિ વિગલચ્છાપશલ્યામહલ્યાં
    કૃત્વા ભઙ્ક્ત્વા ભવાનીરમણભુજસરોજાલયં ચાપદણ્ડમ્ ।
પાણૌ કૃત્વાવનેયીં ભૃગુસુતવિજયી ભ્રાતૃભિઃ પ્રાપ્તદારૈઃ
    યોઽવાત્સીદાત્મપુર્યાં સ દિશતુ ભગવાન્ મઙ્ગલં રામચન્દ્રઃ ॥ ૨॥

માતુર્વાચા સુમિત્રાતનયજનકજામાત્રમિત્રપ્રવિષ્ટઃ
    કાન્તારં શાન્તચેતાઃ કલશભવમુનેરાશ્રમં પ્રાપ્ય ભૂયઃ ।
પ્રીત્યૈ તસ્ય પ્રતિજ્ઞાં નિશિચરકુલનિર્મૂલનાયાત્તરોષઃ
    ચક્રે યો વિશ્વવીરઃ સ દિશતુ ભગવાન્ મઙ્ગલં રામચન્દ્રઃ ॥ ૩॥

યસ્યા ભ્રાતા દશાસ્યો નિશિચરતરુણીં કામુકીં કારયિત્વા
    ભ્રાત્રા તાં કૃત્તનાસાં ઝટિતિ ખરમુખં રાક્ષસૌઘં ચ હત્વા ।
માયાશક્ત્યૈવ રક્ષોમુષિતજનકજઃ ક્લૃપ્તસુગ્રીવસખ્યઃ
    યો જઘ્ને વાનરેન્દ્રં સ દિશતુ ભગવાન્ મઙ્ગલં રામચન્દ્રઃ ॥ ૪॥

નષ્ટાં કાન્તાં વિચેતું દિશિ દિશિ ચલિતે વાનરાણાં નિકાયે
    શ્રુત્વા કાન્તાપ્રવૃત્તિં પવનસુતગિરા પ્રાપ્તપાથોધિતીરઃ ।
આગ્નેયાસ્ત્રાનુભાવક્ષપિતમદભરં દીનદીનં નદીનં
    તેને યો માનશાલી સ દિશતુ ભગવાન્ મઙ્ગલં રામચન્દ્રઃ ॥ ૫॥

મધ્યેપાથોધિ બદ્ધાં ઝટિતિ ગિરિશતૈઃ સેતુમાઢૈક્ય લઙ્કાં
    હત્વા સભ્રાતૃમિત્રં રણશિરસિ રુષા રાવણં દારચોરમ્ ।
કાન્તાં સ્વીકૃત્ય શુદ્ધાં જ્વલનપતનતઃ પ્રાપ્ય રમ્યામયોધ્યાં
    યોઽવાત્સીદાત્તમોદઃ સ દિશતુ ભગવાન્ મઙ્ગલં રામચન્દ્રઃ ॥ ૬॥

યો નિત્યં રામચન્દ્રસ્તુતિમિતિ જપતિ ધ્વસ્તસર્વારિસઙ્ઘો
    ભુક્ત્વા ભોગાનભીષ્ટાનભિનવયશસા પૂરયિત્વા ત્રિલોકીમ્ ।
અન્તે સઞ્ચિન્ત્ય કાન્તાધનતનયગૃહાદ્યેષુ રૂઢં મમત્વં
    સાક્ષાદાલીયતેઽસૌ ભગવતિ ભવસિન્ધુપ્લવે ચક્રપાણૌ ॥ ૭॥

શ્રીરાઘવં દશરથાત્મજમપ્રમેયં
    સીતાપતિં રઘુકુલાન્વયરત્નદીપમ્ ।
આજાનુબાહુમરવિન્દદલાયતાક્ષં
    રામં નિશાચરવિનાશકરં નમામિ ॥ ૮॥

ઇતિ શ્રીરામમઙ્ગલાશાસનં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Rama Mangalashasanam 2*

pdf was typeset on September 12, 2020

Please send corrections to *sanskrit@cheerful.com*